BIBLIOTHECA INDICA:
A
A COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NO. 1407.

योगशास्त्रम् ।
स्वोपज्ञविवरणसहितम् ।

THE YOGAŚĀSTRA,
with the commentary called
SVOPAJNAVIVARAṆA.

BY

ŚRĪ HEMACHANDRĀCHĀRYA.

EDITED BY
ÇĀSTRA VIÇĀRADA JAINĀCĀRYA
ÇRĪ VIJAYA DHARMA SŪRI.

FASCICULUS IV.

Calcutta:
PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No. 5, Nandakumar Chawdhury's 2nd Lane.
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1916.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENT, MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W.,

*Complete copies of those works marked with an asterisk * cannot be supplie[d]*
of the Fasciculi being out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series

Rs.

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ... ...
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5; Vol. IV, Fasc. 1-8 @ /10/ each 1
Aitereya Lochana. ... ...
Amarkosha, Fasc. 1 ... ...
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each ... ...
Anumana Didhiti Prasarini, Fasc. 1 @ /10/- ... ...
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ... ...
Atmatattaviveka, Fasc. I. ... ...
Açvavaidyaka, Fasc. 1-5 @ /10/ each ... ...
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10 ; Vol. II. Fasc. 1-10 @ 1/ each 2
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol II, Fasc. 1 @ /10/ each ... ...
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-5 @ /10/ each ...
Bhāsavritty ... ...
Bhaṭṭa Dīpikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...
Bauddhastotrasangraha ... ...
Bṛhaddēvatā Fasc. 1-4 @ /10/ each ... ...
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each ... ...
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each ... ...
Cri Cantinatha Charita, Fasc. 1-3 ... ...
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each ... ...
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ... ...
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each ... ...
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each ... ...
Ditto Vol. VII, Fasc. 1-5 @ /10/ ... ...
Ditto Vol. IX. Fasc. 1-2 ... ...
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--17 @ each... ...
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; ... Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-(...
Ditto Vol. IV, Fasc 7-8. @ 1/4/ each ...
Ditto Vol. IV, Fasc. 9-10 @ /10/ ... ...
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each ... ...
*Çrauta Sūtra of Çānkhāyana, Vol. I, Fasc. 1-7 ; ... II, Fasc. 1-4 ; Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each ... ...
Çri Bhāshyam, Fasc. 1-3 @ /10/ each ... ...
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each ... ...
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each ... ...
Ditto Ācharasārah Vol. II, Fasc. 1-4 @ /10/ each ...
Gobhiliya Grihya Sutra, Vol. I @ /10/ each ... ...
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each ... ...
Ditto (Appendix) Gobhila Parisista ... ...
Ditto Grihya Sangraha ... ...
Haralata ... ...
Karmapradiph, Fasc. I ... ...
Kāla Viveka, Fasc. 1-7 @ /10/ each ... ...
Kātantra, Fasc. 1-6 @ /12/ each ... ...
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each ... ...
Kiranavali, Fasc. 1-2 @ /10/ each ... ...
Madana Pārijāta, Fasc. 1-11 @ /10/ each ... ...
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each ... ...
Ditto Vol. IV, fasc. 1 @ ... ...
Manuṭikā Sangraha, Fasc. 1-3 @ /10/ each ... ...
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each ... ...
*Mimāṁsā Darçana, Fasc. 10-19 @ /10/ each ... ...
*Mugdhabodha Vyakaraṇa, Fasc. 1-4 @ /10/ each .. ...

समानधार्मिकाणां च सङ्गमोऽपि महते पुण्याय, किं पुनस्तदनुरूपा प्रतिपत्तिः ? । सा च स्वपुत्रादिजन्मोत्सवे विवाहेऽन्यस्मिन्नपि तथाविधे प्रकरणे साधर्मिकाणां निमन्त्रणम्, विशिष्टभोजनताम्बूलवस्त्राभरणादिदानम्, आपन्निमग्नानां च स्वधनव्ययेनाऽभ्युद्धरणम्, अन्तरायदोषाच्च विभवक्षये पुनः पूर्वभूमिकाप्रापणम्, धर्मे च विषीदतां तेन तेन प्रकारेण धर्मे स्थैर्यारोपणम्, प्रमाद्यतां च स्मारणवारणचोदना[1]प्रतिचोदनाऽऽदिकरणम्, वाचनाप्रच्छना[2]परावर्तनाऽनुप्रेक्षाधर्मकथादिषु यथायोग्यं विनियोजनं, विशिष्टधर्मानुष्ठानकरणार्थं च साधारणपोषधशालादेः करणमिति । श्राविकासु धनवपनं श्रावकवदन्यूनातिरिक्तमुन्नेतव्यम् । तत्र ज्ञानदर्शनचारित्रवत्यः शीलसन्तोषप्रधानाः सधवा विधवा वा जिनशासनानुरक्तमनसः साधर्मिकत्वेन माननीयाः । ननु स्त्रीणां कुतः शीलशालित्वम् ?, कुतो वा रत्नत्रययुक्तत्वम् ?, स्त्रियो हि नाम लोके लोकोत्तरे चाऽनुभवाच्च दोषभाजनत्वेन प्रसिद्धाः । एताः खल्वभूमिजा विषकन्दल्यः, अनभ्रसम्भवा वज्राशनयः, असंज्ञका व्याधयः, अकारणो मृत्युः, अकन्दरा व्याघ्राः, प्रत्यक्षा राक्षस्यः ; असत्यवचनस्य, साहसस्य, बन्धुस्नेहविघातस्य, सन्तापहेतुत्वस्य, निर्विवेकत्वस्य च परमं कारणमिति दूरतः परिहार्याः, तत्कथं दानसंमानवात्सल्यविधानं तासु युक्तियुक्तम् ? । उच्यते । अनेकान्त एषः, यत् स्त्रीणां दोषबहुलत्वमुच्यते, पुरुषेष्वपि हि समानमेतत् । तेऽपि क्रूराशया दोषबहुला नास्तिकाः कृतघ्नाः स्वामिद्रोहिणो देवगुरुवञ्चकाश्च

(१) ड—चोदन- । (२) ड—त—परिवर्तना- ।

दृश्यन्ते। तद्दर्शनेन च महापुरुषाणामवज्ञा कर्तुं न युज्यते, एवं स्त्रीणामपि। यद्यपि कासांचिद्दोषबहुलत्वमुपलभ्यते, तथापि कासांचिद् गुणबहुलत्वमप्यस्ति। तीर्थकरादिजनन्यो हि स्त्रीत्वेऽपि तत्तद्गुणगरिमयोगितया सुरेन्द्रैरपि पूज्यन्ते, मुनिभिरपि स्तूयन्ते।

लौकिका अप्याहुः—

निरतिशयं गरिमाणं तेन युवत्या वदन्ति विद्वांसः।

तं कमपि वहति गर्भं जगतामपि यो गुरुर्भवति ॥१॥ इति ॥

काश्चन स्वशीलप्रभावादग्निं जलमिव, विषधरं रज्जुमिव, सरितं स्थलमिव, विषममृतमिव कुर्वन्ति। चतुर्वर्णे च सङ्घे चतुर्थमङ्गं गृहमेधिस्त्रियोऽपि। सुलसाप्रभृतयो हि श्राविकास्तीर्थकरैरपि प्रशस्तगुणाः, सुरेन्द्रैरपि स्वर्गभूमिषु पुनः पुनर्बहुमतचारित्राः प्रबलमिथ्यात्वैरप्यक्षोभ्यसम्यक्त्वसम्पदः, काश्चिच्चरमदेहाः, काश्चिद्द्वित्रिभवान्तरितमोक्षगमनाः शास्त्रेषु श्रूयन्ते। तदासां जननीनामिव भगिनीनामिव स्वपुत्रीणामिव वात्सल्यं युक्तियुक्तमेवोत्पश्यामः। दुष्प्रसहर्षिपार्श्वे नागिलाख्या व्रतिव्रतिनी श्रावकवदपश्चिमा सत्यश्रीः। तत्कथं श्राविकाः पापबहुनितानिदर्शनेन दूष्यन्ते?। तस्माद्दूरेण न परिहरणीयाः, वात्सल्यं चासां करणीयमित्यलं प्रसङ्गेन। न केवलं सप्तक्षेत्र्यां धनं वपन् महाश्रावक उच्यते, किन्त्वतिदीनेष्वपि निःस्वान्धबधिरपङ्गुरोगार्तप्रभृतिषु कृपया केवलया धनं वपन्, न तु भक्त्या। भक्तिपूर्वकं हि सप्तक्षेत्र्यां यथोचितं दानम्। अतिदीनेषु त्वविचारितपात्रापात्रमविमृष्टकल्पनीयाऽकल्पनीयप्रकारं केवलयैव करुणया स्वधनस्य वपनं न्याय्यम्।

भगवन्तोऽपि हि निष्क्रमणकालेऽनपेक्षितपात्रापात्रविभागं करुणया सांवत्सरिकदानं दत्तवन्त इति । तदेवं भक्त्या सप्तक्षेत्र्यां दीनेषु चातिदयया धनं वपन् महाश्रावक उच्यते । ननु श्रावक इत्युच्यताम्, महाश्रावक इति तु महत्त्वविशेषणं किमर्थमुच्यते ? । श्रावकत्वमविरतानामेकाद्यणुव्रतधारिणां च शृणोतीति व्युत्पत्त्योच्यते ; यदाह—

'सम्मत्तदंसणाई पइदियहं जइजणा सुणेइ य ।
सामायारिं परमं जो खलु तं सावयं बिन्ति ॥ १ ॥

श्रद्धालुतां श्राति पदार्थचिन्तनाद्
धनानि पात्रेषु वपत्यनारतम् ।
किरत्यपुण्यानि सुसाधुसेवना-
दथापि तं श्रावकमाहुरञ्जसा ॥ २ ॥

इति निरुक्ताच्च श्रावकत्वं सामान्यस्यापि प्रसिद्धम् ; विवक्षितस्तु निरतिचारसकलव्रतधारी सप्तक्षेत्रीलक्षणे क्षेत्रे धनवपनाद्दर्शनप्रभावकतां परमां दधानो दीनेषु चात्यन्तकृपापरो महाश्रावकशब्देनोच्यत इत्यदोषः ॥ १२० ॥

सप्तक्षेत्र्यां धनवपनं व्यतिरेकद्वारेण समर्थयते—

यः सद्बाह्यमनित्यं च क्षेत्रेषु न धनं वपेत् ।
कथं वराकश्चारित्रं दुश्चरं स समाचरेत् ? ॥ १२१ ॥

---

(१) सम्प्राप्तदर्शनादिः प्रतिदिवसं यतिजनात् शृणोति च ।
सामाचारीं परमां यः खलु तं श्रावकं ब्रूते ॥ १ ॥

सदिति विद्यमानमसतो हि धनस्य कथं दानं भवेत् ? सदपि बाह्यं शरीराद्बहिर्भूतं आन्तरस्य तु कस्यचिद्दानं न शक्यं कर्तुं, बाह्यमपि यदि नित्यमाकालस्थायि भवेत् तदा न दीयेताऽपि, इदं त्वनित्यं चौरजलज्वलनदायादपार्थिवादिहरणीयं प्रयत्नगोपितमपि पुण्यक्षयेऽवश्यं विनश्यति ; यदस्मद्गुरवः—

[1]अत्थं चोरा विलुंपंति उद्दालंति य दाइया ।
राया वा संवरावेइ बला मोडेइ कत्थइ ॥ १ ॥
जलणो वा विणासेइ पाणियं वा पलावए ।
अवहारेण निग्गच्छे वसणोपहयस्स वा ॥ २ ॥
भूमीसंगोवियं चेव हरन्ति वन्तरा सुरा ।
उज्झित्ता जाइ सव्वं पि मरन्तो वा परं भवं ॥ ३ ॥

अनित्यमपि स्वधनं किञ्चित्क्षेप्तुं शक्यते, न हि बहुतैलमस्तीति पर्वता अभ्यज्यन्त इत्युक्तम् चैत्रेष्विति, क्षेत्राणि येषूप्तं धनं शतसहस्रलक्षकोटिगुणं भवति । एवंविधायामपि सामग्र्यां यः स्वधनं न वपेत् स वराकः निःसत्त्वश्चारित्रं महासत्त्वसेवनीयमतएव दुश्चरं कथं समाचरेत् ? ; धनमात्रलुब्धो निःसत्त्वः कथं सर्वसङ्गत्यागरूपं चारित्रं विदधीत ?, अनाराधितचारित्रश्च कथं सद्गतिं

---

(१) अर्थं चौरा विलुम्पन्ति, उद्दालयन्ति च दायादाः ।
राजा वा संवारयति बलात् त्रुट्यते कुत्रापि ॥ १ ॥
ज्वलनो वा विनाशयति पानीयं वा प्लावयति ।
अपहारेण निर्गच्छेत् व्यसनोपहतस्य वा ॥ २ ॥
भूमीसंगोपितमेव हरन्ति व्यन्तराः सुराः ।
उज्झित्वा याति सर्वमपि म्रियमाणो वा परं भवम् ॥ ३ ॥

प्राप्नुयात् ?, सर्वविरतिप्रतिपत्तिकलशारोपणफलो हि श्रावकधर्मप्रासाद इति ॥ १२१ ॥

इदानीं महाश्रावकस्य दिनचर्यामाह—

ब्राह्मे मुहूर्त्ते उत्तिष्ठेत् परमेष्ठिस्तुतिं पठन् ।
किंधर्मा किंकुलश्चास्मि किंव्रतोऽस्मीति च स्मरन्॥१२२॥

पञ्चदशमुहूर्ता रजनी, तस्यां चतुर्दशो मुहूर्तो ब्राह्मस्तस्मिन्नुत्तिष्ठेत् निद्रां जह्यात् ; परमे तिष्ठन्तीति परमेष्ठिनः पञ्चार्हदादयस्तेषां स्तुतिं नमो अरिहन्ताणमित्यादिरूपामात्यन्तिकतद्बहुमानकार्यभूतां परममङ्गलार्थं वा पठन्नव्यक्तवर्णामिति शेषः ।

यदाह—

'परमेट्ठिचिन्तणं माणसम्मि सेज्जागएण कायव्वं ।
सुत्ता विणयपवित्ती निवारिया होइ एवं तु ॥ १ ॥

अन्ये त्वविशेषेणैव नमस्कारपाठमाहुर्न सा काचिदवस्था यस्यां पञ्चनमस्कारस्यानधिकार इति मन्वानाः । न केवलं पठन्, को धर्मो यस्याऽसौ किंधर्मा, किंकुलं यस्याऽसौ किंकुलः, किं व्रतं यस्याऽसौ किंव्रतोऽस्मीत्यहमिति च स्मरन्निदं भावतः स्मरणम् । उपलक्षणत्वात्के गुरवो ममेति द्रव्यतः, कुत्र ग्रामे नगरादौ वा वसामीति क्षेत्रतः, कः कालः प्रभातादिरिति कालतश्चेत्यादि स्मरन्, धर्मस्य जैनादेः, कुलस्येक्ष्वाकादेः, व्रतानामणुव्रतादीनां स्मरणे तद्विरुद्धपरिहारस्योपपत्तिमत्त्वात् ॥ १२२ ॥

(१) परमेष्ठिचिन्तनं मानसे शय्यागतेन कर्तव्यम् ।
सुत्ता विनयप्रवृत्तिर्निवारिता भवति एवं तु ॥ १ ॥

ततः—

शुचिः पुष्पामिषस्तोत्रैर्देवमभ्यर्च्य वेश्मनि ।

प्रत्याख्यानं यथाशक्ति कृत्वा देवगृहं व्रजेत् ॥१२४॥

शुचिरिति मलोत्सर्गदन्तधावनजिह्वालेखनमुखप्रक्षालनगण्डूषकरणस्नानादिना शुचिः सन्नित्यनुवादपरं लोकसिद्धो ह्ययमर्थ इति नोपदेशपरम्, अप्राप्ते हि शास्त्रमर्थवत् । न हि मलिनः स्नायात्, बुभुक्षितोऽश्नीयादित्यत्र शास्त्रमुपयुज्यते । अप्राप्ते त्वामुष्मिके मार्गे नैसर्गिकमोहान्धतमसविलुप्तालोकस्य लोकस्य शास्त्रमेव परमं चक्षुरित्येवमुत्तरत्राऽप्यप्राप्ते विषये उपदेशः सफल इति चिन्तनीयम् । न च सावद्यारम्भेषु शास्तॄणां वाचनिक्यप्यनुमोदना युक्ता । यदाहुः—

'सावज्जणवज्जाणं वयणाणं जो न जाणए विसेसं ।

वुत्तं पि तस्स न खमं किमङ्ग ! पुण देसणं काउं ॥ १ ॥

इति शुचित्वमनूद्य पुष्पामिषस्तोत्रैरित्याद्युपदिशति—

वेश्मनि गृहे देवं मङ्गलचैत्यरूपं भगवन्तमर्हन्तमभ्यर्च्य पूजयित्वा, पूजाप्रकारानाह—पुष्पामिषस्तोत्रैरिति, पुष्पाणि कुसुमानि पुष्पग्रहणं सर्वेषां सुगन्धिद्रव्याणां विलेपनधूपगन्धवासवस्त्राभरणादीनामुपलक्षणम् । आमिषं भक्ष्यं पेयं च, तत्र पक्वान्नफलाऽक्षतदीपजलघृतपूर्णपात्रादिरूपं, स्तोत्रं शक्रस्तवादिसद्भूतगुणोत्कीर्तनरूपं, ततः प्रत्याख्यानं नमस्कारसहिताद्यद्धारूपं सङ्केतरूपं च

(१) सावद्यानवद्यानां वचनानां यो न जानाति विशेषम् ।
उक्तमपि तस्य न क्षमं किमङ्ग ! पुनर्देशनां कर्तुम् ॥

ग्रन्थिसहितादि कृत्वा यथाशक्नोति शक्त्यनतिक्रमेण, शक्तितस्त्या-गतपसी इति सुप्रसिद्धमेव, देवगृहं भक्तिचैत्यरूपं व्रजेद्गच्छेत् । अत्र च स्नानविलेपनवर्णकविशिष्टवस्त्राभरणालङ्कारशस्त्रपरिग्रह-विशिष्टवाहनाधिरोहणप्रभृतीनां स्वतः सिद्धत्वान्नोपदेशः । अप्राप्ते शास्त्रमर्थवदित्युक्तमेव देवगृहव्रजनविधिः पुनरयम्-यदि राजा भवति तदा "सव्वाए इड्ढीए सव्वाए दित्तीए सव्वाए जुईए सव्वबलेणं सव्वपोरिसेणं" इत्यादिवचनात्प्रभावनानिमित्तं महर्द्ध्या याति ।

अथ सामान्यविभवस्तदा औद्धत्यपरिहारेण लोकोपहासं परिहरन् व्रजति ॥ १२३ ॥

ततः—

प्रविश्य विधिना तत्र त्रिः प्रदक्षिणयेज्जिनम् ।
पुष्पादिभिस्तमभ्यर्च्य स्तवनैरुत्तमैः स्तुयात् ॥ १२४ ॥

तत्र देवगृहे विधिना विधिपूर्वकं प्रविश्य त्रिस्त्रीन् वारान् प्रदक्षिणयेत् प्रदक्षिणीकुर्यात् ; जिनमर्हद्भट्टारकम्, प्रवेशविधिश्चा-यम्—पुष्पताम्बूलादिसचित्तद्रव्याणां क्षुरिकापादुकाद्यचित्तद्रव्याणां च परिहारेण कृतोत्तरासङ्गो जिनबिम्बदर्शनेऽञ्जलिबन्धं शिर-स्यारोपयन् मनसश्च तत्परतां कुर्वन्निति पञ्चविधाभिगमेन नैषे-धिकीपूर्वं प्रविशति ।

---

(१) सर्वया ऋद्ध्या, सर्वया दीप्त्या, सर्वया द्युत्या, सर्वबलेन, सर्वपौरुषेण ।

यदाह—[1]सचित्ताणं दव्वाणं वि उसरणयाए, अचित्ताणं दव्वाणं वि उसरणयाए, एगल्लसाडिएणं उत्तरासङ्गकरणेणं चक्खुफासे अञ्जलिपग्गहेणं मणसो एगत्तीभावकरणेणंति ।

यस्तु राजादिः चैत्यभवनं प्रविशति स तत्कालं राजचिह्नानि परिहरति ।

यदाह—

[2]अवहट्टु रायकउआइं पञ्च वररायकउआरूवाइं ।
खग्गं छत्तोवाणह मउडं तह चामराओ य ॥ १ ॥

पुष्पादिभिरिति पुष्पग्रहणं मध्यग्रहणे आद्यन्तयोरपि ग्रहणमिति न्यायप्रदर्शनार्थम्, तथाहि—नित्यं विशेषतश्च पर्वणि स्नात्रपूर्वकं पूजाकरणमिति स्नात्रकाले प्रथमं सुगन्धिश्रीखण्डेन जिनबिम्बस्य तिलककरणम् ।

ततः—

मीनकुरङ्गमदागुरुसारं सारसुगन्धिनिशाकरतारम् ।
तारमिलन्मलयोत्थविकारं लोकगुरोर्दह धूपमुदारम् ॥ १ ॥

इति वचनाद्धूपोत्क्षेपणम्, ततः सर्वौषध्यादिद्रव्याणां जलपूर्णकलशे क्षेपणं, पश्चात् कुसुमाञ्जलिक्षेपपूर्वकं सर्वौषधिकर्पूरकुङ्कुमश्रीखण्डागुरुप्रभृतिभिर्जलमिश्रैर्घृतदुग्धप्रभृतिभिश्च स्नात्र-

---

(१) सचित्तानां द्रव्याणामपि अवसरणतया, अचित्तानां द्रव्याणामपि अवसरणतया, एकशाटकेनोत्तरासङ्गकरणेन, चक्षुःस्पर्शे अञ्जलिप्रग्रहेण मनस एकत्वीभावकरणेनेति ।

(२) अपहृत्य राजककुदानि पञ्च वरराजककुदरूपाणि ।
खड्गः छत्रमुपानद्‌ मुकुटं तथा चामराणि च ॥

करणम्, ततः सुरभिणा मलयजरसादिना विलेपनविधानम्, ततः सुगन्धिजाति-चम्पक-शतपत्र-विचकिल-कमलादिमालाभिर्भगवतोऽभ्यर्चनम्, रत्नसुवर्णमुक्ताभरणादिभिरलङ्करणम्, वस्त्रादिभिः परिधापनम्, पुरतश्च सिद्धार्थकशालितण्डुलादिभिरष्टमाङ्गलिकालेखनम्, तत्पुरतश्च बलिमङ्गलदीपदधिघृतादीनां ढौकनम्, भगवतश्च भालस्थले गोरोचनया तिलककरणम्, तत आरात्रिकाद्युत्तारणम् ।

यदाह—

'गन्धवरधूवसव्वोसहीहि उअगाइएहिं चित्तेहिं ।
सुरहिविलेवणवरकुसुमदामबलिदीवएहिं च ॥ १ ॥
सिद्धत्थयदहिअक्खयगोरोअणमाइएहिं जहलाभं ।
कञ्चणमोत्तिअरयणाइदामएहिं च विविहेहिं ॥ २ ॥
पवरेहिं साहणेहिं पायं भावो वि जायए पवरो ।
न य अन्नो उवओगो एएसिं सिया ण लट्ठयरो ॥ ३ ॥ त्ति ।

एवं भगवन्तमभ्यर्च्य पूजयित्वा ऐर्यापथिकीप्रतिक्रमणपूर्वकं शक्रस्तवादिभिर्दण्डकैश्चैत्यवन्दनं कृत्वा स्तवनैः स्तोत्रैरुत्तमैरुत्तम-

---

(१) गन्धवरधूपसर्वौषधीभिरुदकादिकैश्चित्रैः ।
सुरभिविलेपनवरकुसुमदामबलिदीपकैश्च ॥ १ ॥
सिद्धार्थक-दध्यक्षत-गोरोचनादिकैर्यथालाभम् ।
काञ्चनमौक्तिकरत्नादिदामभिश्च विविधैः ॥ २ ॥
प्रवरैः साधनैः प्रायो भावोऽपि जायते प्रवरः ।
न चान्य उपयोग एतेषां स्याद् मनोहरतरः ॥ ३ ॥ इति ।

कविरचितैः स्तूयाद् गुणोत्कीर्तनं कुर्यात्। स्तोत्राणां चोत्तमत्व-मिदमुक्तम्—

यथा—

पिण्डक्रियागुणगतैर्गम्भीरैर्विविधवर्णसंयुक्तैः।
आशयविशुद्धिजनकैः संवेगपरायणैः पुण्यैः॥ १॥
पापनिवेदनगर्भैः प्रणिधानपुरस्सरैर्विचित्रार्थैः।
अस्खलितादिगुणयुतैः स्तोत्रैश्च महामतिग्रथितैः॥२॥ इति।

न पुनरेवंविधैः—

एकं ध्याननिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या विपुले नितम्बफलके शृङ्गारभारालसम्।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः॥ १॥

तथा—

धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः॥ १॥

तथा—

[1]पनमत पनयप्पकुपितगोलीचलणग्गलग्गपडिबिंबं।
दससु नखतप्पनेसुं एकातसतनुधलं लुद्दं॥ १॥

---

(१) प्रणमत प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिबिम्बम्।
दशसु नखदर्पणेषु एकादशतनुधरं रुद्रम्॥ १॥

तथा—

एतत्किं शिरसि स्थितं मम पितुः खण्डं सुधादीधिते-
लीलाटं किमिदं विलोचनमिदं हस्तेऽस्य किं पन्नगः ।
इत्थं क्रौञ्चरिपोः क्रमादुपगते दिग्वाससः शूलिनः
प्रश्ने वामकरोपरोधसुभगं देव्याः स्मितं पातु वः ॥ १ ॥

तथा—

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसं वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥ १ ॥

[1]अनेन च सम्पूर्णो वन्दनाविधिरुपलक्षितः ।

यथा—

[2]तिन्नि निसीहिय तिन्नि य पयाहिणा तिन्नि चेव य पणामा ।
तिविहा पूआ य तहा अवत्थतियभावणं चेव ॥ १ ॥
तिदिसिनिरक्खणविरई भूमीइ पमज्जणं च तिक्खुत्तो ।
वणाइतियं मुद्दातियं च तिविहं च पणिहाणं ॥ २ ॥
पुप्फामिसथुइभेआ तिविहा पूआ अवत्थतियगं तु ।

---

(१) च एतेन ।

(२) तिस्रो नैषेधिक्यस्तिस्रश्च प्रदक्षिणास्त्रय एव च प्रणामाः ।
त्रिविधा पूजा च तथाऽवस्थात्रिकभावनं चैव ॥ १ ॥
त्रिदिग्निरीक्षणविरतिर्भूमौ प्रमार्जनं च त्रिकृत्वः ।
वर्णादित्रिकं मुद्रात्रिकं च त्रिविधं च प्रणिधानम् ॥ २ ॥
पुष्पामिषस्तुतिभेदात्त्रिविधा पूजाऽवस्थात्रिकं तु ।

[1]छउमत्थ-केवलित्तं सिद्धत्तं भुवणनाहस्स ॥ ३ ॥
वण्णाइतियं तु पुणो वण्णत्थालम्बणसरूवं तु ।
मणवयणकायजणियं तिविहं पणिहाणमवि होइ ॥ ४ ॥

तथा —

[2]पंचंगो पणिवाओ थयपाढो होइ जोगमुद्दाए ।
वन्दन जिणमुद्दाए पणिहाणं मुत्तसुत्तीए ॥ १ ॥
दो जाणू दोन्नि करा पंचमयं होइ उत्तिमंगं तु ।
सम्मं संपणिवाओ नेओ पंचंगपणिवाओ ॥ २ ॥
अन्नोन्नंतरिअंगुलिकोसागारेहिं दोहिं हत्थेहिं ।
पिट्टोवरिकोप्परसंठिएहिं तह जोगमुद्दत्ति ॥ ३ ॥
चत्तारि अंगुलाइं पुरओ ऊणाइं जत्थ पच्छिमओ ॥
पायाणं उस्सग्गो एसा [3]पुण होइ जिणमुद्दा ॥ ४ ॥

---

(१) छद्मस्थ-केवलित्वं सिद्धत्वं भुवननाथस्य ॥ ३ ॥
वर्णादित्रिकं तु पुनर्वर्णार्थालम्बनस्वरूपं तु ।
मनो-वचन कायजनितं त्रिविधं प्रणिधानमपि भवति ॥ ४ ॥

(२) पञ्चाङ्गः प्रणिपातः स्तवपाठो भवति योगमुद्रया ।
वन्दनं जिनमुद्रया प्रणिधानं मुक्ताशुक्त्या ॥ १ ॥
द्वे जानुनी द्वौ करौ पञ्चमकं भवत्युत्तमाङ्गं तु ।
सम्यक् संप्रणिपातो ज्ञेयः पञ्चाङ्गप्रणिपातः ॥ २ ॥
अन्योन्यान्तरिताङ्गुलिकोशागाराभ्यां द्वाभ्यां हस्ताभ्याम् ।
उदरोपरिकूर्परसंस्थिताभ्यां तथा योगमुद्रेति ॥ ३ ॥
चत्वार्यङ्गुलानि पुरत ऊनानि यत्र पश्चिमकः ।
पादयोरुत्सर्ग एषा पुनर्भवति जिनमुद्रा ॥ ४ ॥

(३) ख ग ड खलु ।

[1]मुत्तासुत्तीमुद्दा [2]जत्थ समा दोवि गब्भिया हत्था ।
ते पुण णिडालदेसे लग्गा अन्ने अलग्गत्ति ॥ ५ ॥ इत्यादि ।

ऐर्यापथिकीप्रतिक्रमणपूर्वकं चैत्यवन्दनमित्युक्तम् । तत ऐर्यापथिकीसूत्रं व्याख्यायते-तच्च इच्छामि पडिक्कमिउमित्यादि तस्स मिच्छामि दुक्कडमित्यन्तम्, इच्छामि पडिक्कमिउं इरियावहियाए विराहणाए; इच्छामि अभिलषामि प्रतिक्रमितुं प्रतीपं क्रमितुम्, ईरणमीर्या गमनमित्यर्थ:, तत्प्रधान: पन्था ईर्यापथ:, तत्र भवा ऐर्यापथिकी; काऽसौ? विराधना जन्तुबाधा, तस्या ऐर्यापथिक्या विराधनाया: सकाशात् प्रतिक्रमितुमिच्छामीति सम्बन्ध: । अस्मिंश्च व्याख्याने ईर्यापथनिमित्ताया एव विराधनाया: प्रतिक्रमणं स्याद् न तु शयनादेरुत्थितस्य कृतलोचादेर्वा; तस्मादन्यथा व्याख्यायते—ईर्यापथ: साध्वाचार:, यदाह- ईर्यापथो मौनध्यानादिकं भिक्षुव्रतं तत्र भवा ऐर्यापथिकी; काऽसौ? विराधना साध्वाचारातिक्रमरूपा तस्या इच्छामि प्रतिक्रमितुमिति सम्बन्ध: । साध्वाचाराऽतिक्रमश्च प्राणातिपातादिरूप: । तत्र च प्राणातिपातस्यैव गरीयस्त्वम्, शेषाणां तु पापस्थानानामत्रैवान्तर्भाव:, अत एव प्राणातिपातविराधनाया एवोत्तर: प्रपञ्च: । क्व सति विराधना? गमणागमणे गमनं चागमनं च समाहारद्वन्द्वस्तस्मिन्,

---

(१) मुक्ताशुक्तिमुद्रा यत्र समौ द्वावपि गर्भितौ हस्तौ ।
तौ पुनर्ललाटदेशे लग्नावन्यावलग्नाविति ॥ ५ ॥

(२) क ग ङ समा जहिं ।

गमनं प्रयोजने सति बहिर्यानम्, आगमनं प्रयोजनसमाप्तौ स्वस्थान एव गमनम्। गमनागमनेऽपि कथं विराधना? इत्याह—पाणक्कमणे प्राणाक्रमणे प्राणिनो द्वीन्द्रियादयस्तेषामाक्रमणं पादेन पीडनं प्राणाक्रमणं तत्र; तथा, बीअक्कमणे बीजाक्रमणे, अनेन बीजानां जीवत्वमाह; तथा, हरिअक्कमणे हरिताक्रमणे; अनेन सकलवनस्पतेः, तथा, ओसाउत्तिंगपणगदगमट्टीमक्कडासंताणासंकमणे, अवश्यायो जलविशेषः, इह चावश्यायग्रहणमतिशयतः शेषजलसम्भोगपरिहरणार्थम्, उत्तिंगा गर्दभाकृतयो जीवाः, ते हि भूमौ विवराणि कुर्वन्ति, कीटिकानगराणि वा उत्तिंगाः; पनकः पञ्चवर्णोल्लिः; दकमृत्तिका अनुपहतभूमौ चिक्खिल्लः; अथवा, दकशब्देनाप्कायो गृह्यते मृत्तिकाशब्देन तु पृथ्वीकाय इति; मर्कटः कोलिकस्तस्य सन्तानो जालकम्, ततश्चावश्यायश्चोत्तिङ्गश्चेत्यादिद्वन्द्वः. तेषां संक्रमणमाक्रमणं तस्मिन्। कियन्तो वा भेदेनाख्यातुं शक्यन्ते? इत्याह—जे मे जीवा विराहिया ये केचन सर्वथा मया जीवा विराधिता दुःखे स्थापिताः; ते च एगिंदिया एकं स्पर्शनमात्रमिन्द्रियं येषां ते एकेन्द्रियाः पृथिव्यप्तेजोवायुवनस्पतिलक्षणाः; बेइंदिया द्वे स्पर्शनरसने इन्द्रिये येषां ते द्वीन्द्रियाः कृम्यादयः; तेइंदिया त्रीणि स्पर्शनरसनघ्राणानि इन्द्रियाणि येषां ते त्रीन्द्रियाः पिपीलिकादयः; चउरिंदिया चत्वारि स्पर्शनरसनघ्राणचक्षुर्लक्षणानीन्द्रियाणि येषां ते चतुरिन्द्रिया भ्रमरादयः; पंचिंदिया पञ्च श्रोत्रान्तानि इन्द्रियाणि येषां ते पञ्चेन्द्रिया मूषकादयः। विराधनाप्रकारमाह अभिहया अभिमुखा हताश्चरणेन घट्टिताः, उत्क्षिप्य क्षिप्ता

वा ; वत्तिआ वर्तिताः पुञ्जीकृताः धूलिचिक्कणादिना स्थगिताः ; लेसिआ श्लेषिताः पिष्टा भूम्यादिषु वा लगिताः ; संघाइया संघातिताः अन्योन्यगात्रैरेकत्र लगिताः ; संघट्टिया संघट्टिताः मनाक् स्पृष्टाः ; परिआविआ परितापिताः समन्ततः पीडिताः ; किलामिआ क्लमिता ग्लानिमापादिता मारणान्तिकं समुद्घातं नीता इत्यर्थः ; उद्दविआ अवद्राविता उत्त्रासिताः ; ठाणाउ ठाणं संकामिया स्वस्थानात् परस्थानं नीताः ; जीवियाओ ववरोविया जीवितात् व्यपरोपिता मारिता इत्यर्थः ; तस्स तस्स अभिहया इत्यारभ्योक्तविराधनाप्रकारस्य सर्वस्य मिच्छामि दुक्कडं मिथ्या मे दुष्कृतम् एतद् दुष्कृतं मिथ्या मे भवतु विफलं भवत्वित्यर्थः । मिच्छामि दुक्कडमित्यस्य पूर्वाचार्या निरुक्तविधिमुपदर्शयन्ति—

तद्यथा —

[1]मित्ति मिउमद्दवत्ते छत्ति य दोसाण छायणे होइ ।
मित्ति अमेराए ठिओ दुत्ति दुगंछामि अप्पाणं ॥ १ ॥
कत्ति कडं मे पावं डत्ति य डेवेमि तं उवसमेणं ।
एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥ २ ॥

एवमालोचनाप्रतिक्रमणरूपं द्विविधं प्रायश्चित्तं प्रतिपद्य कायोत्सर्गलक्षणं प्रायश्चित्तं प्रतिपित्सुरिदं सूत्रं पठति—तस्स उत्तरीकरणेणं

---

(१) मीति मृदु-मार्दवार्थे छेति च दोषाणां छादने भवति ।
मीत्यमर्यादायां स्थितो दु-इति जुगुप्से आत्मानम् ॥ १ ॥
कंति कृतं मे पापं डेति च लङ्घयामि तदुपशमेन ।
एष मिच्छादुक्कड (मिथ्यादुष्कृत) पदाक्षरार्थः समासेन ॥ २ ॥

पायच्छित्तकरणेणं विसोहीकरणेणं विसल्लीकरणेणं पावाणं कम्माणं निग्घायणट्ठाए ठामि काउस्सग्गं। तस्यालोचितप्रतिक्रान्तस्य विराधनाप्रकारस्य उत्तरीकरणादिना हेतुभूतेन ठामि काउस्सग्गमिति योगः। तत्रोत्तरकरणं पुनः संस्कारद्वारेण परिष्करणमनुत्तरस्योत्तरस्य करणमुत्तरीकरणम्; अयं भावः—विराधनस्य हि पूर्वमालोचनादिकं कृतं तस्यैव कायोत्सर्गकरणमुत्तरकरणम्, तेन पापकर्मनिर्घातना भवति। उत्तरीकरणं च प्रायश्चित्तकरणद्वारेण भवति इत्याह-पायच्छित्तकरणेणं प्रायो बाहुल्येन चित्तं जीवं मनो वा शोधयति प्रायश्चित्तम्; यद्वा, पापं छिनत्तीति पापच्छित् आर्षत्वात्पायच्छित्तं तस्य करणेन हेतुभूतेन। प्रायश्चित्तकरणं च विशुद्धिद्वारेण भवतीत्याह—विसोहीकरणेणं विशोधनं विशुद्धिः अपराधमलिनस्यात्मनो निर्मलीकरणं विशुद्धेः करणं विशुद्धिकरणं तेन हेतुभूतेन। विशुद्धिकरणं च विशल्यकरणद्वारेण भवति अत आह—विसल्लीकरणेणं विगतानि शल्यानि मायादीनि यस्याऽसौ विशल्यः, अविशल्यस्य विशल्यस्य करणं तेन हेतुभूतेन। किमित्याह-पावाणं कम्माणं निग्घायणट्ठाए पापानां संसारनिबन्धनभूतानां कर्मणां ज्ञानावरणीयादीनां निर्घातनार्थाय निर्घातनमुच्छेदः स एवार्थः प्रयोजनं तस्मै, ठामि काउस्सग्गं अनेकार्थत्वाद्धातूनां ठामि करोमि कायस्य उत्सर्गो व्यापारवतः परित्यागस्तम्। किं सर्वथा? नेत्याह—अन्नत्थ ऊससिएणं अन्यत्रोच्छ्वसितात्, तृतीया पञ्चम्यर्थे, ऊर्ध्वं प्रलम्बं वा श्वसितमुच्छ्वसितं तस्मात् योऽन्यो व्यापारस्तेन व्यापारवतः

कायस्य उत्सर्ग इत्यर्थः, उच्छ्वसितं हि निरोद्धुमशक्यम्, तन्निरोधे सद्यः प्राणविघाताद्यापत्तेः।

यदाह—

[१]ऊसासं न निरु'भइ अभिग्गहिओवि किमुअ चिट्ठाए।
सज्ज मरणं निरोहे सुहुमुस्सासं तु जयणाउ ॥ १ ॥

एवं निःश्वसिताद्यपि नीससिएणं अधःश्वसितं निःश्वसितं तस्मात्; खासिएणं काशितात्; छिएणं क्षुतात्; जम्भाइएणं विवृतवदनस्य प्रबलपवननिर्गमो जृम्भितं तस्मात्; उड्डुएणं उद्गारितात्; वायनिसग्गेणं अपानेन पवननिर्गमो वातनिसर्गस्तस्मात्; भमलिए शरीरभ्रमेराकस्मिक्याः; पित्तमुच्छाए पित्तप्राबल्यान्मनाग्मोहो मूर्च्छा तस्याः; सुहुमेहिं अंगसंचालेहिं सूक्ष्मेभ्यो लक्ष्यालक्ष्येभ्योऽङ्गसञ्चारेभ्यो गात्रविचलनप्रकारेभ्यो रोमोद्गमादिभ्यः; सुहुमेहिं खेलसंचालेहिं सूक्ष्मेभ्यः खेलस्य श्लेष्मणः सञ्चारेभ्यः; आत्मनो हि वीर्ययुक्तद्रव्यतया अन्तःसूक्ष्मश्लेष्मसञ्चारः सम्भवतीत्यतोऽन्यत्रोच्यते सुहुमेहिं दिट्ठिसंचालेहिं सूक्ष्मेभ्यो दृष्टिसञ्चारेभ्यो निमेषादिभ्यः; सूक्ष्मा हि दृष्टिसञ्चारास्तदा सर्वथा निरोद्धुं शक्यन्ते यदा एकस्मिन् द्रव्ये दृष्टिनिवेशः स्थिरीकर्तुं शक्यते, न च शक्यते कर्तुमिति। उच्छ्वसितादिभ्योऽन्यत्र कायोत्सर्गं करोमीत्येतावता किमुक्तं भवति एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउस्सग्गो एवमादिभिरुच्छ्वसितनिःश्वसितादिभिः पूर्वोक्तैराकारैरपवादरूपै-

(१) उच्छ्वास' न निरुणद्धि आभिग्रहिकोऽपि किमुत चेष्टया।
सद्यो मरणं निरोधे सूक्ष्मोच्छ्वास' तु यतनया॥ १ ॥

रभग्नोऽविराधितो मे कायोत्सर्गो भूयादिति सम्बन्धः; आदिशब्दादन्यैरपि यदा अग्नेर्विद्युतो वा ज्योतिः स्पृशति तदा प्रावरणायोपधिग्रहणं कुर्वतो न कायोत्सर्गभङ्गः। ननु नमस्कारमेवाभिधाय किमिति तद्ग्रहणं न करोति येन तद्भङ्गो न भवति ? । उच्यते—नाऽत्र नमस्कारेण पारणमेवावशिष्टकायोत्सर्गमानं क्रियते, किन्तु यो यत्परिमाणः कायोत्सर्ग उक्तस्तावन्तं कालं प्रतीक्ष्य तत ऊर्ध्वं नमस्कारमपठित्वा पारयतो भङ्गोऽपरिसमाप्तेऽपि च पठतो भङ्ग एव, तस्माद्यो यत्परिमाणः कायोत्सर्गस्तस्मिन् पूर्णे एव नमो अरिहंताणमिति वक्तव्यम्। तथा मार्जारमूषिकादेः पुरतो गमनेऽग्रतः सरतोऽपि न भङ्गः। तथा चौरसंभ्रमे राजसंभ्रमे वा अस्थानेऽपि नमस्कारमुच्चारयतो न भङ्गः। तथा सर्पदष्टे आत्मनि परे वा साध्वादौ सहसा उच्चारयतो न भङ्गः।

यदाहुः—

[1]'अगणि-उच्छिन्दिज्ज-बोहिअखोभाइ-दीहडक्को वा।

आगारेहिं न भग्गो उस्सग्गो एवमाईहिं ॥ १ ॥

आक्रियन्ते आगृह्यन्ते इत्याकाराः कायोत्सर्गापवादप्रकारा इत्यर्थः, तैराकारैर्विद्यमानैरपि भग्नः सर्वथा विनाशितः, न भग्नोऽभग्नः, विराधितो देशभग्नः, न विराधितोऽविराधितो भवेन्मम कायोत्सर्गः। कियन्तं कालं यावदित्याह—जाव अरिहंताणं भगवंताणं नमोक्कारेणं न पारेमि यावदिति कालावधारणे, याव-

---

(१) अग्न्यु-च्छेद्य-बोधिकक्षोभादि दीर्घदष्टो वा।

आकारैर्न भग्न उत्सर्ग एवमादिभिः ॥ १ ॥

दर्हतां भगवतां सम्बन्धिना नमस्कारेण नमोऽरिहंताणमित्यनेन न पारयामि न पारं गच्छामि तावत्किमित्याह ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि तावत्तावन्तं कालं कायं देहं स्थानेनोर्द्धस्थानेन हेतुभूतेन ऊर्द्धस्थानमभिगृह्य कायप्रसरनिषेधेने-त्यर्थः, मौनेन वाग्निरोधलक्षणेन, ध्यानेन शुभेन सद्विषये चिन्तामभि-गृह्येत्यर्थः; अप्पाणं आर्षत्वादात्मीयं कायं वोसिरामि व्युत्-सृजामि कुव्यापारनिराकरणेन परित्यजामि। अन्ये तु अप्पाणमिति न पठन्ति। अयमर्थः—पञ्चविंशत्युच्छासमानं कालं यावदूर्द्ध-स्थानस्थितः प्रलम्बभुजो निरुद्धवाक्प्रसरः प्रशस्तध्यानाऽनुगत-स्तिष्ठामि स्थानमौनध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासद्वारेण व्युत्सृजामि। पञ्चविंशत्युच्छ्वासाश्च चतुर्विंशतिस्तवेन चन्देसु नि-म्मलयरा इत्यन्तेन चिन्तितेन पूर्यन्ते, पायसमा ऊसासा इति वचनात्। संपूर्णकायोत्सर्गश्च नमो अरहंताणमिति नमस्कारपूर्वकं पारयित्वा चतुर्विंशतिस्तवं सम्पूर्णं पठति। एवं सन्निहिते गुरौ तत्समक्षं, गुरुविरहे तु गुरुस्थापनां मनसिकृत्वा ईर्यापथप्रतिक्रमणं निर्वर्त्य चैत्यवन्दनमुत्कृष्टमारभ्यते, जघन्यमध्यमे तु चैत्यवन्दने ऐर्यापथिकीप्रतिक्रमणमन्तरेणाऽपि भवतः। अत्र नमस्कारेण नमो अरहंताणमित्यनेन

वपुरेव तवाचष्टे भगवन्! वीतरागताम्।
न हि कोटरसंस्थेऽग्नौ तरुर्भवति शाड्वलः॥ १॥

इत्यादिना कविकृतेन च जघन्या चैत्यवन्दना भवति। अन्ये तु प्रणाममात्ररूपां जघन्यां चैत्यवन्दनां वदन्ति।

प्रणामस्तु पञ्चधा—

एकाङ्गः शिरसो नामे स द्व्यङ्गः करयोर्द्वयोः ।
त्रयाणां नमने त्र्यङ्गः करयोः शिरसस्तथा ॥ १ ॥
चतुर्णां करयोर्जान्वोर्नमने चतुरङ्गकः ।
शिरसः करयोर्जान्वोः पञ्चाङ्गः पञ्चके नतेः ॥ २ ॥

मध्यमा तु स्थापनार्हतस्तवदण्डकेन स्तुत्या चैकया भवति । यदाह—

[1]नवकारेण जहन्ना दंडगथुइजुगल मज्झिमा णेया ।
संपुण्णा उक्कोसा विहिणा खलु वंदणा तिविहा ॥ १ ॥

इत्युत्कृष्टया चैत्यवन्दनया वन्दितुकामो विरतः साधुः श्रावकश्च अविरतसम्यग्दृष्टिरपुनर्बन्धको वा यथाभद्रको यथोचितं प्रतिलेखितप्रमार्जितस्थण्डिलो भुवनगुरौ विनिवेशितनयनमानसः संवेगवैराग्यवशादुत्पन्नरोमाञ्चकञ्चुको मुदश्रुपूर्णलोचनः अतिदुर्लभं भगवत्पादवन्दनमिति बहु मन्यमानो योगमुद्रया अस्खलितादिगुणोपेतं तदर्थानुस्मरणगर्भं प्रणिपातदण्डकसूत्रं पठति । तत्र च त्रयस्त्रिंशदालापका आलापकद्विकादिप्रमाणाश्च विश्रामभूमिरूपा नवसम्पदो भवन्ति । यदाह—

[2]दो तिअ चउर ति पंचा दोन्नि अ चउरो य हुन्ति तिन्नेय ।
सक्कथए नव संपय तित्तीसं होन्ति आलावा ॥ १ ॥

(१) नमस्कारेण जघन्या दण्डकस्तुतियुगलात् मध्यमा ज्ञेया ।
सम्पूर्णोत्कृष्टा विधिना खलु वन्दना त्रिविधा ॥ १ ॥

(२) द्वौ त्रयश्चत्वारस्त्रयः पञ्च द्वौ च चत्वारश्च भवन्ति त्रयश्च ।
शक्रस्तवे नव सम्पदास्त्रयस्त्रिंशद् भवन्ति आलापाः ॥ १ ॥

एताश्च यथास्थानं नामतः प्रमाणतश्च कथयिष्यन्ते । व्याख्या नमोत्थुणं अरहंताणं भगवंताणं तत्र नम इति नैपातिकं पदं पूजार्थं, पूजा च द्रव्यभावसङ्कोचः । तत्र करशिरःपादादिद्रव्यसन्न्यासो द्रव्यसङ्कोचः, भावसङ्कोचस्तु विशुद्धस्य मनसो नियोगः, अस्त्विति भवतु । प्रार्थनैषा धर्मबीजमाशयविशुद्धिजनकत्वात् । णमिति वाक्यालङ्कारे । अतिशयपूजामर्हन्तीति अर्हन्तः ।

यदाह—

'अरहंति वंदणनमंसणाइं अरहंति पूयसक्कारं ।

सिद्धिगमणं च अरिहा अरहंता तेण वुच्चंति ॥ १ ॥

सुगद्विषार्हः सत्रिशत्रुस्तुत्ये ॥५।२।२६॥ इति वर्त्तमानकालेऽतृश् । कथं वर्तमानकालत्वमिति चेत्, पूजारम्भस्याऽनुपरमात् । एष एव हि न्याय्यो वर्तमानकालो यत्रारब्धस्यापवर्गो नास्ति । तथा अरिहननादर्हन्तः, अरयश्च मोहादयः साम्परायिककर्मबन्धहेतवः, तेषामरीणामनेकभवगहनव्यसनप्रापणकारणानां हननादर्हन्तः । तथा रजोहननादर्हन्तः, रजश्च घातिकर्मचतुष्टयं येनावृतस्यात्मनः सत्यपि ज्ञानादिगुणस्वभावत्वे घनसमूहस्थगितगभस्तिमण्डलस्य विवस्वत इव तद्गुणानामभिव्यक्तिर्न भवति तस्य हननादर्हन्तः । तथा रहस्याभावादर्हन्तः ; तथाहि—भगवतां निरस्तनिरवशेषज्ञानावरणादिकर्मपारतन्त्र्याणां केवलमप्रतिहतमनन्तमद्भुतं ज्ञानं दर्शनं चास्ति, ताभ्यां जगदनवरतं युगपत्प्रत्यक्षतो जानतां पश्यतां च

(१) अर्हन्ति वन्दन-नमस्यनान्यर्हन्ति पूजासत्कारम् ।
सिद्धिगमने च अर्हा अर्हन्तस्तेनोच्यन्ते ॥ १ ॥

रहस्यं नास्ति, तस्माद्रहस्याभावादर्हन्तः। एषु त्रिष्वर्थेषु पृषोदरादित्वादर्हदिति सिद्ध्यति। अथवा अविद्यमानं रह एकान्तरूपो देशोऽन्तश्च मध्यं गिरिगुहादीनां सर्ववेदितया प्रच्छन्नस्य कस्याप्यभावेन येषां तेऽरहोऽन्तरस्तेभ्योऽरहोन्तभ्यः। अथवा अरहद्भ्यः क्षीणरागत्वात् क्वचिदप्यासक्तिमगच्छद्भ्यः। अथवा अरहद्भ्यो रागद्वेषहेतुभूतमनोज्ञेतरविषयसंपर्केऽपि वीतरागत्वादिकं स्वं स्वभावमत्यजद्भ्यः। अरिहंताणमिति पाठान्तरं वा; तत्र कर्मारिहन्तृभ्यः।

आह च—

'अट्ठविहं पि हु कम्मं अरिभूयं होइ सयलजीवाणं।
तं कम्ममरिहंता अरिहंता तेण वुच्चंति॥ १॥

अरुहंताणमित्यपि पाठान्तरम्। तत्र अरोहद्भ्योऽनुपजायमानेभ्यः, क्षीणकर्मबीजत्वात्।

उक्तञ्च—

दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः।
कर्मबीजे तथा दग्धे नारोहति भवाङ्कुरः॥ १॥

शाब्दिकास्तु अर्हच्छब्दस्यैव प्राकृते रूपत्रयमिच्छन्ति; यद्वयमवोचाम—"उच्चार्हति" ॥८।२ १११॥ चकारादर्हितावपि, तेभ्योऽर्हद्भ्यो नमोऽस्त्विति नमःशब्दयोगाच्चतुर्थी, "चतुर्थ्याः षष्ठी" ॥८।३।१३१॥ इति प्राकृतसूत्राच्चतुर्थ्याः स्थाने षष्ठी। बहुवचनं चा-

---

(१) अष्टविधमपि खलु कर्माऽरिभूतं भवति सकलजीवानाम्।
तत् कर्मारिहन्तारोऽर्हन्तस्तेनोच्यन्ते॥ १॥

द्वैतव्यवच्छेदेनाऽर्हद्बहुत्वख्यापनार्थम्, विषयबहुत्वेन नमस्कर्तुः फलातिशयज्ञापनार्थं च । एते चाऽर्हन्तो नामाद्यनेकभेदा इति भावार्हत्सम्परिग्रहार्थमाह भगवद्भाः—

भगोऽर्कज्ञानमाहात्म्ययशोवैराग्यमुक्तिषु ।
रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ॥ १ ॥

इति वचनादर्कयोनिवर्जमिह द्वादशधा भगशब्दस्यार्थः स विद्यते येषां ते भगवन्तः, निन्दावर्जं भूम्यादिष्वर्थेषु मतुः ; ज्ञानं तावद्गर्भनिवासात् प्रभृति आदीक्षातो मतिश्रुतावधिलक्षणं दीक्षानन्तरं त्वघातिकर्मचतुष्टयक्षयाद् मनःपर्यायज्ञानसहितम्, घातिक्षये चानन्तमनन्तविषयं निःशेषभावाभावस्वभावावभासकं केवलज्ञानम् । १ । माहात्म्यं प्रभावातिशयः, तच्च सर्वकल्याणकेषु नारकाणामपि सुखोत्पादकत्वेन नित्यसन्तमसेष्वपि नरकेषु प्रकाशजनकत्वेन गर्भनिवासात् प्रभृति कुलस्य धनादिवर्धनेनाऽप्रणतसामन्तानां च प्रणत्येतिमारिवैरोपहतिवर्जितराज्यकरणेनाऽतिवृष्ट्यनावृष्टिप्रभृत्युपद्रवरहितजनपदत्वेन चलितासनसकलसुरासुरप्रणतपादपद्मत्वेन चाऽवसेयम् । २ । यशस्तु रागद्वेषपरीषहोपसर्गपराक्रमसमुत्थमाकालप्रतिष्ठं यत्सर्वदा दिवि सुरसुन्दरीभिः पाताले नागकन्याभिर्गीयते सुरासुरैर्नित्यमभिष्टूयते च ।३। वैराग्यं महन्नरेन्द्रलक्ष्मीमनुभवतामपि यत्र तत्र रतिर्नाम, यदा तु सर्वविषयत्यागपूर्वकं प्रव्रज्यां प्रतिपद्यन्ते तदाऽलमेभिरिति, यदा तु क्षीणकर्माणो भवन्ति तदा सुखदुःखयोर्भवमोक्षयोरौदासीन्यमिति त्रिविधमप्यतिशायि भवति ।

यदवोचाम वीतरागस्तोत्रे—

यदा मरुन्नरेन्द्रश्रीस्त्वया नाथोपभुज्यते ।
यत्र तत्र रतिर्नाम विरक्तत्वं तदापि ते ॥ १ ॥
नित्यं विरक्तः कामेभ्यो यदा योगं प्रपद्यसे ।
अलमेभिरिति प्राज्यं तदा वैराग्यमस्ति ते ॥ २ ॥
सुखे दुःखे भवे मोक्षे यदौदासीन्यमीशिषे ।
तदा वैराग्यमेवेति कुत्र नाऽसि विरागवान् ॥३॥ इति ।४।

मुक्तिश्च सकलक्लेशप्रहाणलक्षणा सन्निहितैवेति । ५ ।

रूपं तु—

[1]सव्वसुरा जइ रूवं अंगुट्ठपमाणयं विउव्विज्जा ।
जिणपायंगुट्ठं पइ न सोहए तं जहिंगालो ॥ १ ॥

